IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)

An International Open Access, Peer-reviewed, Refereed Journal

# अर्थशास्त्रे लोकतान्त्रिकमूल्यानुशीलनम्

**बाप्पा-दत्तः**

**सहायक-आचार्यः, संस्कृत-विभागः**

**सेवायतन-शिक्षण-महाविद्यालयम्, पश्चिमबङ्गम्**

**संक्षिप्तसारः (Abstract):**

लोकतन्त्रः समाजस्य प्राणरूपात्मकः वर्तते । यथा शरीरे पञ्चप्राणवायवः सञ्चरन्ति तेषु प्रमुखरूपेण प्राणवायुः भवति तथैव समाजरूपात्मके शरीरे प्राणवायुरूपेण लोकतन्त्रं सञ्चरति। अस्मिन् लोकतन्त्रे जनतायाः कर्तव्यमेवञ्च अधिकारस्य या भावना समाजे दरीदृश्यते तस्य सम्यक्प्रकारेण अनुपालनं भवति। प्राचीनकालादारभ्यः अद्यावधिपर्यन्तं मनुष्याणां कल्याणाय यद् किमपि भवति तत्सर्वं लोकतन्त्रस्य प्रभावात्कारणादेव भवति । इदं लोकतन्त्रं सामाजिक-राजनैतिक-आर्थिक-सांस्कृतिक-विचाराणां या अवधारणा लोके दृश्यते तस्य संरक्षणं करोति। समाजे यद् किमपि भवति तस्य व्यवहारदिशा अनुपालनाय सर्वैः प्रयतते। राजतन्त्रात्मके समाजे राजा एव सर्वं भवति स्म। राजा यथैव वदति स्म तथैव कार्यं जनैः क्रियते स्म। परञ्च लोकतन्त्रे एवं न दृश्यते। अस्मिन् खलु संसारे यदा लोकतन्त्रस्य सत्ता समागता तदा मनुष्याः स्वतन्त्ररूपेण कार्यं कर्तुं समर्थाः अभवन् । अस्मिन् प्रगतिशीलसमाजे सर्वेषां यः अधिकारः वर्तते तस्य संरक्षणं संविधान-माध्यमेन सर्वदा भवति । अस्य संविधानस्य निर्माणं संरक्षणञ्च प्रजानां सर्वविधकल्याणं दृष्ट्वा एव अभवत्। इदानीं भारतस्य यद् संविधानं वर्तते तत्र लोकतन्त्रस्य संरक्षणं कथं भवेदिति विचार्य्य एव सर्वं निर्मितम्। अद्य आधुनिकसमाजे जनाः प्रगतिशीलाः वर्तन्ते। अत्र मनुष्याः नवोन्मेषशालिनीप्रतिभया बुद्ध्या च नवीनं कार्यं अनुदिनं आविष्कुर्वन्ति। अनेन आविष्कारेण ज्ञायते यद् तेषां कार्यसम्पादने स्वतन्त्रता वर्तते। इदानीमाधुनिकसमाजः येन प्रकारेण द्रुतगतिना विकाशं करोति तस्य साक्षात्-प्रमाणं लोकतन्त्रं वर्तते।

**कुञ्चिशब्दाः (Keywords):** भारतीय-संविधानम्, अर्थशास्त्रम् , लोकतन्त्रम्

**प्राक्-कथनम् (Introduction):**

प्राचीनकाले लोकतन्त्रप्रणाल्यां जनप्रतिनिधीनां विशिष्टं स्थानमासीत् । परन्तु वर्तमानलोकतन्त्रे जनप्रतिनिधीनां कृते योग्यतायाः महत्वपूर्णं स्थानं नास्ति अपि तु गौणमेव । एतदर्थं जनाधार एव महत्वपूर्णं स्थानं भजते । संस्कृतसाहित्ये जनप्रतिनिधीनां कृते दिशानिर्देशः विद्यते । यदि तस्य प्रयोगः जनप्रतिनिधयः स्वस्मिन् प्रशासनपद्धतौ नयेयुः तदा शासनसञ्चालनं सम्यक्प्रकारेण भवेदिति । अतः लोकतन्त्रीयशासनप्रणाल्यां ये ये प्राचीनाधुनिकाश्च विचाराः प्रस्तुताः सन्ति तेषां समेषां विचाराणां संस्कृतसाहित्ये यत्र तत्र सर्वत्र प्रायः उपलब्धिर्भवति। तेषां स्वरूपगतं चिन्तनमपि प्राप्यते। तत्स्वरूपगतं चिन्तनं ग्रन्थेभ्यः भिन्नमिव प्रतिभाति । व्यवहारिकधरातले तेषां विचाराणां दर्शनं तथा न भवति यथा अपेक्षते । अद्यत्वे लोकतन्त्रस्य विकृतं स्वरूपं दृग्गोचरी भवति । स्वतन्त्रतायाः समानतायाश्च नाम्ना उच्छृङ्खलतायाः बाहुल्यं दृश्यते । समाजे मात्स्यन्यायव्यवस्था प्रत्यक्षा भवति । सर्वसाधारणजनाः मूकभूत्वा अन्यायस्य सहनमेव कर्वुन्ति । अभिव्यक्तिस्वतन्त्रतायां विकृतप्रदर्शनं दृश्यते । यदि कोऽपि एवं वदति यत्मानवतायाः स्थाने दानवतायाः आविर्भावः जन्यते तदा न अतिशयोक्तिः । लोभातुरः मानवः सम्पत्तिसंग्रहार्थं निरंकुशो भूत्वा कार्यं करोति । अधिकाधिकसम्पत्तिसञ्चये एव जनाः संलग्नाः सन्ति। अस्य विरोधे श्रीमद्भागवतमहापुराणे प्रोक्तमस्ति यत्यया सम्पत्या जीविकोपार्जनं सम्भवति ताः एव सम्पत्तयः मान्याः भवन्ति । तदर्थापेक्षया संग्रहः दण्डनीयः भवति। प्रोक्तञ्च-

**“यावद् भ्रियेत जठरं तावत् सत्वं हि देहिनाम्।**

**अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति ।।” १**

आधुनिककाले विधि-नैयायिकक्षेत्रयोः दण्ड्यः दण्डं न प्राप्नोति अदण्ड्यः दण्डं प्राप्नोति । शिक्षायोग्योऽधिकारी शिक्षाभ्यः मुक्तः भवति। किमिदमेव लोकतन्त्रम् ? एतासां परिस्थितीनां निर्णेतुमस्माकं समक्षं संस्कृतसाहित्यस्य कौटिल्यविरचितमर्थशास्त्रमेव दीपस्तम्भ इव प्रत्यक्षमागच्छति। न केवलं जनतानिमित्तमेव अपि तु समाजस्योपरि शासनार्थमेव पाथेयः भवति। स्वतन्त्रभारते तत्कालीनाः राजनेतारः यां प्रणालीं स्वीकृतवन्तः तासां प्रणालीनां गुणदोषानुसारेण मूल्याङ्कनं भवति । तदा प्रतिभाति यत् उत्तरोत्तरकाले तत्र ह्रास एव सम्मुखी भवति । तस्य ज्वलन्तमुदाहरणं वर्तमानकालिकं जनक्रोशपूर्णं वातावरणमेव । वर्तमानशासनप्रणाल्यां लोकसभा तथा राज्यसभारूपेण क्रियान्वयनं प्राप्यते । नैयायिकसंस्थानमस्ति । उच्चन्यायालयः सर्वोच्चन्यायालयश्चोभौ मिलित्वा कार्यं कुरुतः। तथापि लोकतन्त्रे लोकपालविधेयकस्यावश्यकता प्रतीयते। तं लोकपालविधेयकं प्रस्तौतुं प्रयाशः प्रचलति । अस्मिन् विषये राष्ट्रीयस्तरे उच्चैः चर्चा श्रूयते । विचारेण स्पष्टमिदं भवति यत् लोकतान्त्रिकस्तरे अवमूल्यायनमेव प्रतिभाति। विधिं निषेधं च तिरस्कृत्य स्वेच्छाचारिता उत्तरोत्तरं वर्धिता भवति। तस्मिन्सन्दर्भे लोकतन्त्रविषये कोटिल्यविरचितमर्थशास्त्रं सामाजिकसंतुलननिर्वाहे नैतिकमूल्यस्थापने च अतीव भूमिकां निर्वहति इति वक्तुं शक्यते।

**अध्ययनस्य उद्देश्यम्  (Objectives of the Study):**

क) कौटिलीय-अर्थशास्त्रे वर्णितस्य लोकतान्त्रिकमूल्यबोधस्य स्वरूपानुसन्धानम् ।

ख) वर्तमाने अर्थशास्त्रे वर्णितलोकतन्त्रस्य प्रासङ्गिकत्वं निरूपणम् ।

**गवेषणायाः पद्धतिः (Research Methodology):**

क) वर्तमान-अध्ययने वर्णनामूलकगवेषणापद्धत्यनुसरणम्  (Descriptive research method followed)

ख) अत्र विषयवस्तूनां गुणगतरूपेण समीक्षणं व्याख्याञ्च प्रस्तूयते (Content analysis was used qualitatively)

**अध्ययनस्य व्याख्या विश्लेषणञ्च (Analysis and Interpretation of the Study):**

**१.सार्वभौमः(Sovereign):**

सार्वभौमशब्दस्य व्याख्याप्रसङ्गे उच्यते यत् यत्र वैश्विकव्यपकत्त्वं समानत्त्वं व्यवहारिकत्त्वञ्च परिलक्ष्यते तस्यैव नाम सार्वभौमः। सार्वभौमसत्तायां सर्वेषां मनुष्यानां यथायोग्यं समाननीतिनियमयोः व्यवस्था भवति स एव सार्वभौमः। अस्मिन् सार्वभौमशासने सर्वेषां प्राणीनां व्यवहारिकत्त्वं दृष्ट्वा कार्यं क्रियते। अस्मिन् कुत्रापि केनापि सह विरोधः न दृश्यते। यथा भारतीयसंविधानस्य प्रस्तावनायां वर्णितं भारतं सार्वभौमराष्ट्ररूपेण परिगण्यते। अत्र सार्वभौमशब्दस्यार्थः समाजस्य मध्ये राष्ट्रस्य नीतिनियमयोः समानत्त्वं बोध्यते । सार्वभौमिकतायाः द्विविधः अर्थः- आभ्यन्तरवाह्यश्च । आभ्यन्तरसार्वभौमिकतायाः अर्थः देशाभ्यन्तरे विद्यमानाः सर्वे मानवाः भारतराष्ट्रस्य नियन्त्रणाधीनाः । वाह्यसार्वभौमिकार्थः अन्तरराष्ट्रियक्षेत्रे भारतः वाह्यशत्रुभ्यः नियन्त्रणात्मुक्तः ।

**राष्ट्राभ्यन्तरनीत्यानुसरणम् –**

**"अनर्थ्याश्च प्रिया हृष्टाश्चित्तज्ञानानुवर्तिनः। अभिहास्येष्वभिहसेद् घोरहासांश्च वर्जयेत्" २**

राज्ये सर्वासां प्रजानां कृते मनोविनोदव्यवस्था पृथक् पृथक् वर्तते। तथैव राज्ञः चित्तवृत्तिं दृष्ट्वा विनोदाय व्यवस्था भवति स्म। तत्र राज्ञः अनुकूलत्त्वं दृष्ट्वा प्रजाः तिष्ठन्ति स्म। यदि राजा हसति तदा प्रजाः अपि हसन्ति। तत्र मौनं धृत्वा कोऽपि न तिष्ठति। राज्ञः मनोविनोदाय गीतवाद्यनृत्यनाट्यसर्वेषां व्यवस्था तदानीमासीत्। गीतवाद्यनृत्यनाट्यादीनां व्यवस्था सम्यक्तया आसीत्। तत्र अकारणं हासपरिहासयोः वर्जनं अपि दृश्यते। लोकतान्त्रिकसत्तायां यद्यपि एतादृशी स्थितिः न परिलक्ष्यते। परञ्च शिष्टसमाजे अनर्थकं हासपरिहासं वर्जितमस्ति। यथा अत्र दृश्यते यत् ये राज्ञः चित्तज्ञानानुवर्तिनः राजच्छन्दानुवर्तिनः, ते यदि अनर्थ्याश्च अनर्थवहाः नटनर्तकादयोऽपि, राज्ञः प्रियाः हृष्टाः भवन्ति । हसति राज्ञि ते अभिमुखं हसेत् न तु काष्ठवन्निर्विकारस्तिष्ठेत्। घोरहासान् वर्जयेच्च।

**२.समाजतान्त्रिकः ( Socialist):**

सममजन्ति इति समाजः। अस्मिन् समाजे एका शासनव्यवस्था कार्यं करोति। यस्याः नाम तन्त्रं वर्तते। अस्यैव तन्त्रस्य संज्ञा शासनमस्ति। शासनविहीनं जीवनममर्यादितं भवति। अतः एकस्याः व्यवस्थायाः आवश्यकता प्रतिभाति। केचन मनुष्याः एकत्र सम्भूय समाजस्य निर्माणं कुर्वन्ति। अस्य समाजस्य सम्यक्तया परिपालनाय तन्त्रं निर्मीयते। तेनैव तन्त्रानुसारेण तस्य समाजस्य वैयक्तिक-पारिवारिक-सामाजिक-आर्थिक-सांस्कृतिक-विकाशो भवति । अर्थशास्त्रे राजतान्त्रिक-प्रजातान्त्रिक-समाजतान्त्रिक-लोकतान्त्रिक-इत्यादिभिः शब्दैः व्यवहृत- शासनव्यवस्था सञ्चालनाय तन्त्रस्य वर्णनं प्राप्यते । तदनुगुणमेव अन्यशासनव्यवस्था अपि प्रचलति । यथा भारते यदा स्वतन्त्रताप्राप्तिरभवत्तदा एकस्य तन्त्रस्य आवश्यकता तदानीन्तनाः समाजतन्त्ररक्षकाः अनुभूतवन्तः । तदा एकस्य संविधानस्य निर्माणं कृतवन्तः । तस्य संविधानस्य संशोधनं षट्सप्तत्यधिकं नवविंशति इति ईशवीयाब्दे (१९७६) द्विचत्वारिंशत्तमे (४२) अभवत् । ततः परं संविधानसंशोधनकारणात्भारतं समाजतान्त्रिकराष्ट्ररूपेण परिगणितम् । अस्य लक्ष्यं यथा- पारस्परिकं मैत्रीवन्धने आवद्धमेकं-श्रेणिहीन-वर्णहीन-धनी-दरिद्र-वैषम्यहीन-समाजव्यवस्थागठनम् । न केवलं समाजव्यवस्थागठनमपि तु समाजकर्तृकन्यस्तदायित्वं निष्ठासहकारेण पालनं साधारणजनानां कर्तव्यमिति तत्र वर्ण्यते ।

**समाजं प्रति निष्ठासहकारेण दायित्वपालनम् -**

**“राज्ञा बृद्धसंयोगेन प्रज्ञां, चारेण चक्षुः, उत्थानेन योगक्षेमसाधनम्, कार्यानुशासनेन स्वधर्मस्थापनम्, विनयं विद्योपदेशेन, लोकप्रियत्वमर्थसंयोगेन,हितेन वृत्तिम्”** ३

राजा राज्यसञ्चालने अनेकेषामुपकरणानां प्रयोगोपयोगश्च करोति। तस्य राज्ञः अनेके जनाः सहायकाः भवन्ति। ते जनाः स्वनिष्ठया कर्तव्यत्त्वेन च राज्यसञ्चालनाय राजानं सहयोगं कुर्वन्ति। ते एव जनाः राज्ञः अङ्गानि भवन्ति। यथा उच्यते- **न सा सभा यत्र न सन्ति वृद्धाः।** अत्र वृद्धपदेन ज्ञानवृद्धत्त्वं विद्योत्यते। राजा राज्यसञ्चलनाय एकस्याः परिषदः संगठयति। तत्र राज्यस्य ये खलु ज्ञानवृद्धाः पूर्वकार्यानुभवदक्षाः नीतिकुशलाश्च ये जनाः सन्ति तेषां सहयोगेन राजा कार्यं करोति। राज्ञः चक्षुरूपेण सुमुखाः दुर्मुखाश्च अनुचराः भवन्ति। ते अनुचराः यथाकालं राज्यस्य सर्वं समाचारं राजानं श्रावयन्ति। तदनुगुणमेव राजा सर्वं वीक्ष्य कार्यं करोति। अतः चारेण चक्षुः इत्युच्यते। अतः राजा अनेकचक्षुयुक्ता भवति । राज्यस्य सर्वविध- विकाशाय अप्राप्तस्य प्राप्तिः कथं भवेद् पुनश्च प्राप्तस्य संरक्षणं सम्यक्तया भवेदिति एतदर्थं विचारयति । अतः योगक्षेमसाधन-मितिविषयमत्र उच्यते । एतदपि राज्ञः कर्तव्यम् । कार्यानुशासनेन राजा सम्पूर्णं राज्यमनुपालयति । कुत्रापि कार्यावसरे अनुशासनहीनता न भवेद् एतदर्थं शासनव्यवस्थां निर्माति । येन सम्पूर्णराज्ये स्वधर्मस्थापनं भवेद् । यथा **श्रीमद्भगवद्गीतायामपि** उच्यते- **स्वधर्मे निधनं श्रेयः परधर्मो भयावहः** ४। अतः धर्मानुकूलाराज्यव्यवस्था सञ्चरेत् एतदर्थं राजा अहर्निशं चिन्तयति। राज्ये सर्वासु प्रजासु विनयशीलत्त्वं कथं समागच्छेत् अस्मिन्विषये सः विचार्य्य योग्यशिक्षकाणां नियुक्तिं करोति। ते शिक्षकाः स्वकर्तव्यत्त्वेन विद्योपदेशं कुर्वन्ति। यस्मात्कारणात् राज्ये सर्वे जनाः शिक्षिताः भवन्ति। यदि

कस्मिन्नपि राज्ये शिक्षाव्यवस्था सुदृढा न स्यात्तर्हि तत् राज्यं पतनोन्मुखी भवति । कथमिति चेत्मानवजीवनमेकः व्यवहारः वर्तते । अस्य व्यवहारस्य मूलमस्ति ज्ञानम् । अस्य ज्ञानस्य प्राप्तिः शिक्षया एव भवति । अतः राज्ये सम्यक्प्रकारेण विद्योपदेशः कर्तव्यः । येन राज्ये सज्जनानां निर्माणं भवेद् । एवञ्च राज्यव्यवस्था सम्यक्प्रकारेण सञ्चरेत् । राज्ये ये खलु कृषकाः कर्मचारिणः विविधकर्मानुष्ठाने संलग्नाः जनाः वर्तन्ते तैः सह सम्पर्कं संसाध्य यथोचितमर्थसंग्रहं कर्तव्यम् । तस्मिन् राज्ये यथायोग्यं ये खलु जनाः सन्ति यस्मिन्कार्ये ये प्रवीणाः वर्तन्ते तेषां नियुक्तिः तस्मिन्पदे कर्तव्याः । अतः अत्र उच्यते हितेन वृत्तिम् । हितं विचिन्त्य एव वृत्तिव्यवस्था कर्तव्या । अनेन प्रकारेण समाजान्प्रति राजा निष्ठासहकारेण दायित्वपालनं कृतवान् ।

**नागरिकाणां जीवनरक्षणाय पर्याप्तव्यवस्थाग्रहणम्-**

**"दैवान्यष्टौ महाभयानि-अग्निरुदकं व्याधिर्दुर्भिक्षं मूषिका व्यालाः सर्पा रक्षांसीति । तेभ्यो जनपदं रक्षेत्" ५**

यथा धर्मशास्त्रे षड् ईतयः वर्णिताः तैः ईतिभिः राज्यं संरक्षणीयं भवति । तथैव अत्र कौटिल्येनापि दैवीयप्रकोपात् ये विपत्तयः समागच्छन्ति ताभ्यः संरक्षणाय राजा विचारयेदिति । दैव्योविपदः मानवानां रक्षाविधानं राज्ञः कर्तव्यमिति प्रसङ्गे कौटिल्याह- दैवान्यष्टौ महाभयानि इति । अर्थात् दैवविपत्तिः अष्टविधाः- अग्निरुदकं व्याधिर्दुर्भिक्षं मूषिका व्यालाः सर्पा रक्षांसीति । तेभ्यो जनपदं रक्षाविधानं राज्ञ अवश्यकर्तव्यमिति ।

**३. सम्प्रदायनिरपेक्षः( Secular):**

भारतीयसंविधानस्य पञ्चविंशति-अध्यायादष्टविंशति-अध्यायपर्यन्तं (२५-२८) धर्मीय-स्वतन्त्रतायाः अधिकारः स्वीकृतोऽस्ति । Secular शब्दोऽयं ल्याटिन-"Seculum" इति शब्दात् गृहीतो भवति । Secularism इति शब्दस्य प्रतिशब्दःधर्मनिरपेक्षता । धर्मनिरपेक्षः वा सम्प्रदायनिरपेक्षः राष्ट्रः नाम यस्मिन् राष्ट्रे सर्वे नागरिकाः सर्वान्धर्मान्प्रति सम्मानप्रदर्शनं कुर्वन्ति अपि च सर्वेषां नागरिकाणां स्वाधीनभावेन स्वस्वधर्मपालनाय अधिकारलाभाय च सुयोगं विद्यमानमस्ति तत् राष्ट्रं सम्प्रदायनिरपेक्षराष्ट्रं नाम्नाभिधीयते इति ।

**नागरिकाणां स्वाधीनभावेन स्वधर्मपालनम्-**

**"स्वधर्मो ब्राह्मणस्याध्ययनमध्यापनं यजनं याजनं दानं प्रतिग्रहश्चेति" ६**

वर्णधर्ममालोचनावसरे कौटिल्येनोक्तम् – स्वधर्मो इत्यादि । ब्राह्मणस्य स्वधर्मो अध्ययनमर्थात् वेदादिपाठम्, अध्यापनम्, स्वहितार्थे यज्ञसम्पादनं परहितार्थे यज्ञसम्पादनं वा, दानम्, प्रतिग्रहश्चेति ।

**"क्षत्रियस्याध्ययनं यजनं दानं शस्त्राजीवो भूतरक्षणं च" ७**

क्षत्रियस्य स्वधर्मो अध्ययनमर्थात् वेदादिपाठम्, यजनम्, दानम्, शस्त्रेण आजीवो वृत्तिः, भूतरक्षणमर्थात् प्राणिपालनमिति ।

**"वैश्यस्याध्ययनं यजनं दानं कृषिपाशुपाल्ये वणिज्या च"८**

वैश्यस्य स्वधर्मो अध्ययनमर्थात् वेदादिपाठम्, यजनम्, दानम्, कृषिकार्यम्, पशुपालनमर्थात् गवाश्वादीनां पोषणचिकित्सादिकार्यम्, वणिज्या वा क्रयविक्रयव्यवहारः इति ।

**"शूद्रस्य द्विजातिशुश्रूषा वार्ताकारुकुशीलवकर्म च" ९**

शूद्रस्य स्वधर्म द्विजातिशुश्रूषा अर्थात् द्विजातयो ब्रह्मक्षत्रियवैश्याः तेषां परिचरणम्, कृषिपशुपाल्य- वणिज्यादिकार्यम्, शिल्पिकर्म चारणकर्म च इति ।

**४.न्यायविचारः ( Justice):**

भारतीयसंविधाने न्यायविचारः इति पदमतीव-व्यापकार्थे व्यवहृतम् । अनेन पदेन भारतराष्ट्रस्य सर्वान् नागरिकान् न्यायविचारस्य अन्तर्भुक्तं कृतवन्तः । अनेन भारतीयसंविधानानुसारेण न्यायविचारः त्रिविधः-

**४क) सामाजिक-न्यायविचारः (Social Justice)**

**४.ख) अर्थनैतिक-न्यायविचारः ( Economic Justice)**

**४.ग) राजनैतिक-न्यायविचारः ( Political Justice)**

**४क. सामाजिक-न्यायविचारः (Social Justice):**

सामाजिक-न्यायविचारः नाम साधारणतः समाजस्य प्रत्येकान् मानवान्प्रति सममर्यादाप्रदानं बोध्यते । येन प्रकारेण सर्वे मानवाः स्व-स्वज्ञानवृद्धिरात्मविकाशश्च सुयोगलाभं कर्तुं पारयन्ति । अनग्रसरान्मानवान्प्रति विशेषसुविधाप्रदानं प्रयच्छन्ति । अपि च यस्मिन् राष्ट्रे अपराधीनां कृते यथायोग्यदण्डव्यवस्था-प्रदानं कुर्वन्ति, यस्मिन् राष्ट्रे यथार्थविचारव्यवस्थायाः प्रचलनं वर्तते , यत्र दायित्वशीलं शासनव्यवस्यायाः प्रचलनमासीत्तत्र सामाजिक-न्यायविचारः सम्यक्-रूपेण प्रचलितः वर्तते इति ।

**यथायोग्य-दण्डव्यवस्थायाः विधानम् –**

**"दण्डस्य नीतिर्दण्डनीतिः, अलब्ध-लाभार्था, लब्धपरिरक्षणी, रक्षितविवर्धनी,वृद्धस्य तीर्थे प्रतिपादनी च" १०**

आचार्येण कौटिल्येन "वार्तादण्डनीतिस्थापना" इति अध्याये दण्डस्य स्वरूपनिर्णयावसरे उक्तम्- दण्डस्य नीतिर्दण्ड इति। दण्डो हि सामादिषु प्रधानभूत उपायविशेषः । दण्डभये लोक आन्वीक्षिक्यादिषु सम्यक् प्रवर्तते, न त्वितरथेति दण्डस्यान्वीक्षिक्यादियोगक्षेमसाधनत्वं विज्ञेयम् । तस्मात् मनुना प्रोक्तम् -

**सर्वो दण्डजितो लोको दुर्लभो हि शुचिर्नरः।**

**दण्डस्य हि भयात्सर्वं जगद्भोगाय कल्पते ।। ११**

दण्डेन ह्यलब्धं लभ्यते, लब्धं परिरक्ष्यते, परिरक्षितं वर्ध्यते, वर्धितं च तीर्थेषु पुण्यक्षेत्राध्वरादिषु विनियुज्यते। अर्थात् यथायोग्य-दण्डव्यवस्थायाः विधाने सामाजिकन्यायविचारः यथार्थरूपेण प्रयोगं भवति।

**यथार्थविचारव्यवस्थायाः प्रचलनम् –**

**"मन्दापराधं बालं वृद्धं व्यधितं मत्तमुन्मत्तं क्षुत्पिपासाध्वक्लान्तमत्याशितमामकाशितं दुर्बलं वा न कर्म कारयेत्"१२**

दण्डनकर्मसु अयोजनीयाः अपराधिनः इत्यस्मिन्प्रसङ्गे अर्थशास्त्रकारेणोच्यते-मन्दापराधमिति। अर्थात् अल्पापराधकाले बालकं वृद्धं रोगीं नेशाग्रस्तमुन्मत्तं क्षुत्पिपासाध्वक्लान्तमतिमात्रभुक्तान्नमजीर्णान्नं दुर्वलं वा न कर्म कारयेत् राजा इति।

**४ख.अर्थनैतिक-न्यायविचारः (Economic Justice):**

भारतीयसंविधानानुसारेण नागरिकाणामर्थनैतिकसुविधाप्रदानं नाम यथार्थरूपेण अर्थनैतिक-न्यायविचारप्रदानं बोध्यते। अतः अनेन प्रतिपाद्यते यत्सर्वेषां नागरिकाणामर्थनैतिकमुपार्जनमर्थनैतिकं सुविधाभोगार्थं कर्मव्यावस्थायाः प्रयोजनमिति।

**प्रजानामर्थनैतिकसुविधाप्रदानम्-**

**"ये चास्य धान्य-पशुहिरण्यान्याजीवन्ति, तैरुपकुर्वन्ति व्यसनेऽभ्युदये वा,कुपितं बन्धुं राष्ट्रं वा व्यावर्तयन्ति"१३**

आचार्येण कौटिल्येन प्रजासु तुष्ट्यतुष्ट्यादिज्ञानावश्यकता प्रसङ्गे उक्तम्- ये चास्य इति। ये अस्य राज्ञः धान्यपशुहिरण्यानि आजीवन्ति वा उपजीवन्ति, तैः धान्यादिभिः व्यसने अभ्युदये वा अस्य उपकुर्वन्ति, ये वा कुपितं बन्धुं राष्ट्रं च व्यवर्तयन्ति, ये वा अमित्रं शत्रुमाटविकमटवीपालं प्रतिषेधयन्ति शत्रुभवाद् वारयन्ति, तेषां तुष्टातुष्टत्वं, मुण्डजटिलव्यञ्जना मुण्डजटिलवेषा विद्युः।

**५.स्वतन्त्रता (Liberty):**

भारतीयसंविधानानुसारेण निरपेक्षन्यायविचारस्य अपरिहार्यमङ्गरूपेण स्वतन्त्रताशब्दं विशेषतात्पर्यपूर्णम्। स्वतन्त्रता नाम सर्वेषां मानवानां निर्भयेन स्वाधीनभावेन चिन्तनं मतप्रकाशं विद्याभ्यासं धर्ममुपासनाञ्च बोध्यते। स्वतन्त्रता द्विविधार्थे व्यवहृता - इतिवाचकः नेतिवाचकश्चेति। नेतिवाचकार्थे स्वतन्त्रता नाम नागरिकजीवनस्योपरि नियन्त्रणस्यावसानं बोध्यते। अपि च इतिवाचकार्थे स्वतन्त्रता नाम व्यक्तेः व्यक्तित्वविकाशस्योपयोगी परिवेशसंरक्षणं बोध्यते।

**निर्भयेन स्वाधीनभावेन मतप्रकाशम् -**

**“न कश्चिदवमन्येत सर्वस्य शृणुयान्मतम् । बालस्याप्यर्थवद्वाक्यमुपयुञ्जीत पण्डितः” १४**

अर्थशास्त्रकारेणोक्तम्-तस्मिन्समये राजा सर्वेषां प्रजानां मतं मनयोगसहकारेण शृणोति स्म । न कमपि अवमाननं कृतवान् । बालकस्य वाक्यमपि यदि सारगर्भो भवेद् तर्हि पण्डिताः तस्योपयोगं स्वीकुर्वन्ति ।

**“देशकालकार्यवशेन त्वेकेन सह द्वाभ्यामेको वा यथासामर्थ्यं मन्त्रयेत्” १५**

आचार्येण कौटिल्येन सविस्तारेण स्वमतस्योपस्थापनप्रसङ्गे उक्तम्- देश-कालेति । स्थान-काल-कार्यवशेन राजा साधारणतः द्वाभ्यामेको वा मन्त्रिणा सह मन्त्रणामकरोत् । अथवा स्वसामर्थ्यानुसारेण मन्त्रविचारमकरोदिति ।

**निर्भयेन स्वाधीनभावेन विद्याचर्चा-**

**“विद्याविनीतो राजा हि प्रजानां विनये रतः । अनन्यां पृथिवीं भुङ्क्ते सर्वभूतहिते रतः”१६**

विद्यायाः सौराज्यमूलताप्रसङ्गे कौटिल्येनोच्यते- विद्याविनीतो इति । अर्थात् विद्यायाः विनीतः वा शिक्षाप्राप्तः राजा प्रजानां पुत्रानां च विनये रतः भवति । अनेन प्रकारेण सर्वभूतहिते रतः राजा अनन्यां पृथिवीं पालनं कर्तुं शक्नोति स्म ।

**६.समता (Equality):**

भारतीय-संविधानस्य एका अपरिहार्या मूल्यबोधः खलु समता । संविधानस्य चतुर्दशाध्यायाद् अष्टादश-अध्यायपर्यन्तं (१४-१८) समतायाः नीतिनियमयोः प्राधान्यं परिलक्ष्यते । समता नाम सर्वेषां मानवानां स्व-स्व-धर्मानुष्ठानावश्यकता नागरिकाणां यथायोग्यमर्यादाप्रदानं नागरिकाणां सुविधाप्रदानं सर्वान्मानवान्प्रति समानव्यवहारश्चेति । अनया समतायामाध्यमेन आदर्श-शोषणहीनः-सुखी-समाजव्यवस्थागठनं सम्भवति ।

**सर्वान्मानवान्प्रति समानव्यवहारः -**

**“राज्ञो हि व्रतमुत्थानैर्यज्ञः कार्यानुशासनम् । दक्षिणा वृत्तिसाम्यं तु दीक्षितस्याभिषेचनम्” १७**

राज्ञः अवश्यकरणीय-कर्तव्यप्रसङ्गे अर्थशास्त्रकारेणोक्तम्-राज्ञो हि । उत्थानमुद्योगं वा राज्ञः व्रततुल्यम् । कार्यानुशासनमर्थात् व्यवहारनिर्णयः तस्य यज्ञानुष्ठानसदृशः । दक्षिणा दानं, वृत्तिसाम्यं शत्रौ मित्रे च गुणदोषापेक्षया तुल्यं व्यवहरणं, दीक्षितस्य अभिषेचनमवभृथनिर्वर्तनं च राज्ञो व्रतमिति ।

**“चतुवर्णाश्रमस्यायं लोकस्याचाररक्षणात् । नश्यतां सर्वधर्माणां राजा धर्मप्रवर्तकः”१८**

सम्यग्व्यवहारदर्शनस्य सर्वलोकयोगक्षेमसाधकतां श्लोकैराह- चतुर्वर्ण इति । अयं राजधर्मः सम्यग्व्यवहारदर्शनरूपः, चतुर्वर्णाश्रमस्य चत्वारो वर्णा ब्राह्मणादयः आश्रमाश्च ब्रह्मचर्यादयो यस्मिंस्तथाभूतस्य, लोकस्य, आचाररक्षणात् स्वस्वसमुदाचारपरिरक्षणाद्धेतोः, नश्यतां सर्वधर्माणां स्वतः क्षीयमाणानां सर्वेषां धर्माणां प्रवर्तकः प्रोज्जीवकः इति ।

**७.सुनिश्चायिका बन्धुता (Fraternity):**

भारतीय-संविधाने वि.आर.आम्वेडकर-महोदयस्य मतानुसारेण भारतीयानां मध्ये परस्परं सहधर्मिताप्रदानम्, शृङ्खलाबोधस्य जागरणम्, नागरिकाणां मध्ये श्रद्धाबोधस्य जागरणमिति समेषां मिलितरूपाणां भावः हि सौभातृत्वबोधः सुनिश्चायिका बन्धुता वा । अनेन सौभातृत्वबोधगठनमाध्यमेन साम्प्रदायिकता-प्रादेशिकता-विच्छिन्नतावाद-प्रभृतीनामशुभशक्तिनां विनाशं संसाध्य ऐक्यस्य मिलनभूमौ परिणतं सम्भवति ।

**मानवान्प्रति सहधर्मिताप्रदानम् -**

**“प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम् । नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम्”१९**

आचार्येण कौटिल्येन अर्थशास्त्रग्रन्थस्य “राजप्रणिधिः” नाम प्रकरणे राज्ञः अवश्यकरणीयानां कर्तव्यप्रसङ्गे उक्तम्- प्रजासुखे इति । प्रजासुखे राज्ञः सुखमनुभवति । प्रजानां हिते राज्ञः हितमनुभवति । न हि आत्मप्रियं प्रजानां प्रियं तु राज्ञः प्रियमेव ।

**“देवब्राह्मणतपस्वि-स्त्रीबालवृद्धव्याधिता-नामनाथानामनभिसरतां धर्मस्थाः कार्याणि कुर्युः। न च देशकाल भोगच्छलेनातिहरेयुः”२०**

देवादीनां सप्तानामनाथानां योगक्षेमचिन्तकरहितानामनभिसरतां स्वदुःखनिवेदनाय धर्मस्थमनभिगच्छतां, कार्याणि, धर्मस्थाः कुर्युः। देशकालभोगच्छलेन देशादिव्याजेन, न चातिहरेयुः अनाथद्रव्यं नातीव हरेयुः इति ।

**सिद्धान्तः (Conclusion of the Study):**

परिशेषे वक्तुं शक्यते यत्कौटिल्यसमये राज्ये प्रवर्तमानानां नीतिनियमयोः अनुमत्यनुसारेण प्रजानां कालमतिवाहितं स्यात् । प्रजाः सर्वदा राजकर्तव्यपालने तत्पराः आसन् । ते प्रभुभक्तिसम्पन्नाः आसन् । तस्मिन्समये राज्याभ्यन्तरं सार्वभौमिकतायाः प्रचलनमासीत् । यत् आधुनिककालेऽपि समानरूपेण प्रयुज्यते इति । तस्मिन्समये राजा प्रजानां जीवनरक्षणाय यथार्थ-व्यवस्थाग्रहणं कृतवान् । प्रजान्प्रति राजा सहृयासीत् । उन्नतसमाजव्यवस्थागठने तथा नागरिकाणां जीवनरक्षणाय च तेषामुपरि आगत-विविध-विपदसमूहान् राज्ञः रक्षाकर्तव्यमेव आसीत् । तत्र येन प्रकारेण धर्मनिरपेक्षताविषये आलोचना वर्तते तत् अतीव प्रशंसनीया । तस्मिन्समये मानवान्प्रति पारस्परिकं श्रद्धाबोधः आसीत् । ते सर्वे नागरिकाः सर्वान्धर्मान्प्रति सम्मानप्रदर्शनं कृतवन्तः। अपि च सर्वेषां नागरिकाणां स्वाधीनभावेन स्वस्वधर्मपालनाय अधिकारलाभाय च सुयोगं विद्यमानमासीत् । तस्मात्तस्मिन् युगस्य राष्ट्रं सम्प्रदायनिरपेक्षराष्ट्रमासीदिति । तस्मिन् राष्ट्रे यथायोग्य- दण्डव्यवस्थायाः प्रचलनमासीत् । येन

समाजे यथार्थः न्यायविचारः प्रचलित वर्तते। तस्मिन्समये यथार्थरूपेण विचारव्यवस्थायाः अपि प्रचलनमासीत्। सामाजिक-न्यायविचारस्य दर्पणः आसीत् कौटिल्यस्य अर्थशास्त्रग्रन्थः। किन्तु वर्तमानकाले यथार्थरूपेण विचारव्यवस्थायाः न्यायव्यवस्थायाः दायित्वशीलप्रशासन-व्यवस्थायाः अभावः दरीदृश्यते । अधुना सामाजिकन्यायविचारस्य मेरुदण्डं भङ्गुरं जातम् । विचारव्यवस्थान्प्रति मानवानामास्था दूरीभूता जाता । मानवान्प्रति सर्वकारस्य वा प्रशासनस्य यथार्थरूपेण दायित्वाभावः अस्माभिः दरीदृश्यते। तस्मिन्समये सामाजिक-राजनैतिक-अर्थनैतिक-न्यायविचारश्च समानरूपेण प्रचलितासीत् इति वक्तुं शक्यते । किन्तु वर्तमाने सम्यक्-प्रकारेण एतादृशी विचारव्यवस्थायाः अभावः दरीदृश्यते। अधुना सर्वत्र असत्यस्य छाया आविर्भूता जाता। कौटिल्यसमये नागरिकाणां तथा प्रजानां स्वाधीनभावेन मतप्रकाशस्यावकाशासीत्। निर्भयेन राजानं प्रति ते वाक्यालापं कर्तुं शक्नुवन्ति स्म । राजापि तेषां मतानुसारेण कदापि वा सिद्धान्तग्रहणं कृतवान्। अर्थात् पारस्परिकं मतप्रकाशस्यावकाशः विद्यमानासीत्तस्मिन्समये । परन्तु वर्तमानलोकतान्त्रिकसमये अस्माकं मतप्रकाशस्यावकाशः क्षीयमानं दृश्यते। अधुना लोकतन्त्रस्य अवक्षयः अस्माभिः दरीदृश्यते। अर्थशास्त्रे वर्णित-स्वतन्त्रतायाः विविधाः मार्गाः सन्ति। येन मार्गेण मानवाः तेषां काङ्खिताचरणं कर्तुं शक्नुवन्ति। नेतिवाचकार्थे स्वतन्त्रता नाम नागरिकजीवनस्योपरि नियन्त्रणावसानं बोध्यते । अपि च इतिवाचकार्थे स्वतन्त्रता नाम व्यक्तेः व्यक्तित्वविकाशस्योपयोगी परिवेशसंरक्षणं बोध्यते । अत्र द्विविध-स्वतन्त्रतायाः विविधानि दृष्टान्तानि परिलक्ष्यन्ते । कौटिल्यसमये राजा सर्वान्मानवान्प्रति समानव्यवहारमकरोत्। तदा समानतायाः नीतिः सम्यक्-प्रकारेण प्रचलिताः आसीत् । परन्तु वर्तमानसमये अस्याः समानतायाः नीतिः विलुप्ताः जाता। अर्थशास्त्रे येन प्रकारेण सौभातृत्वबोधस्य विवरणमस्ति तत् आधुनिककाले न दृश्यते। प्रजान्प्रति राज्ञः इयं सहधर्मिता तथा सौभातृत्वबोधः वर्तमानकाले यथार्थरूपेण द्रष्टुं न शक्यते । नागरिकाणां मध्ये शृङ्खालाबोधस्य जागरणं विषये अर्थशास्त्रे विविधानि दृष्टान्तानि दृश्यन्ते । अर्थशास्त्रे वर्णितविविधतथ्यैः प्रतीयते यत्तस्मिन्समये नागरिकाणां मध्ये श्रद्धाबोधस्य जागरणविषये राज्ञः प्रचेष्टा आसीत्। परन्तु इदानीं काले अस्य विषयस्य कापि पन्था द्रष्टुं न शक्यते। अर्थशास्त्रे सौभातृत्वबोधस्य गुरुत्वमासीत्। न केवलं सौभातृत्वबोधः अपि तु सार्वभौमकता-स्वतन्त्रता- समानता-सम्प्रदायनिरपेक्षता-समाजतान्त्रिकता-सामाजिक-न्यायविचारः-अर्थनैतिक-न्यायविचारः प्रभृतीनां विविध उपादानानां विद्यमानत्वं दृश्यते अर्थशास्त्रग्रन्थे इति निःसन्देहेन वक्तुं शक्यते इति शम्।

**शोधसन्दर्भसूची (Reference):**


१.श्रीमद्भागवतमहापुराणम् ७.१४.८ २. अर्थशास्त्रम् ५.४.४

३. अर्थशास्त्रम् १.७.१ ४. श्रीमद्भगवद्गीता ३.३५

५. अर्थशास्त्रम् ४.३.१ ६. अर्थशास्त्रम् १.३.१

७. अर्थशास्त्रम् १.३.१ ८. अर्थशास्त्रम् १.३.१

९. अर्थशास्त्रम् १.३.१ १०. अर्थशास्त्रम् १.४.१

११.मनुसंहिता ७ /२२ १२. अर्थशास्त्रम् ४.८.५

१३. अर्थशास्त्रम् १.१३.३ १४. अर्थशास्त्रम् १.१५.३

१५. अर्थशास्त्रम् १.१५.५ १६. अर्थशास्त्रम् १.५.४

१७. अर्थशास्त्रम् १.१९.५ १८. अर्थशास्त्रम् ३.१.१०

१९. अर्थशास्त्रम् १.१९.५ २०. अर्थशास्त्रम् ३.२०.६


**शोधसहायक-ग्रन्थसूची (Bibliography):**


Banerjee, Manabendu (ed). *Kautilya : The Arthaśāstra.* Kolkata: Sanskrit Pustak Bhander. 2014. Print.

Banerjee, Manabendu (ed). *Kautilya : The Arthaśāstra.* Kolkata: Sanskrit Pustak Bhander. 2011. Print.

Unni, N.P (ed). *Kautilya: The Arthaśāstra.* New Delhi: New Bharatiya Book Corporation. Print.

Shamasastry, R and Narain.V (ed). *Kautilya: The Arthaśāstra.* Delhi: Chaukhamba Sanskrit Pratishthan.2005.Print.

Mookerjee, R. K. *Ancient Indian Education.* Delhi: Motilal Banarsi Dass.2003.Print.

Shekhar, Himanshu. *Management Guru Chanakya.* Delhi: Diamond Books.2010.Print.